# द्वितीयोऽङ्कः ।

(ततः प्रविशति पटाक्षेपेण श्रमखिन्नो बटुर्विदूषकश्च ।)

(प्रविश्य ।)

**बटुः** - (धावनजवात्स्खलनं नाटयति ।)

**विदूषकः** - (दृष्ट्वा ।) अये अक्षमालावलयितकण्ठदेशः त्रिपुण्ड्राङ्कितललाटफलकः भस्मोद्धूलितविग्रहः शिखया मूषकलाङ्गूलं विडम्बयन् प्रकृतिपटुः कोऽयं बटुः । भवतु । उपसृत्य पृच्छामि । (तथा कृत्वा ।) बटो अनामयं पृच्छामि ।

**बटुः** - (उच्छ्वासस्खलिताक्षरम् ।) अरे तिष्ठ स्थगितश्वासो भूत्वा कथयामि ।

**विदूषकः** - एवं भवतु ।

**बटुः** - (क्षणं विश्रम्य ।) रे कथय किं कथयसि ।

**विदूषकः** - अनामयं पृच्छामि ।

**बटुः** - (सक्रोधम् ।) आः जाल्म अभिवादनमकृत्वैवाऽनामयप्रश्नः ।

**विदूषकः** - (सभ्रूभङ्गम् ।) एतदर्थमेवागमनम् ।

**बटुः** - कथं वागमनं भवतु परं नायं सदाचारः किल विप्रसमागमस्य ।

**विदूषकः** - तुष्यतु दुर्जनः । बटो अभिवादये ।

**बटुः** - (हस्तमुदस्य ।) सुखी भव ।

**विदूषकः** - (सोपहासम् ।) ईश्वरेच्छयैवाहमस्मि । परं केन हेतुना जङ्घालतयाऽऽगम्यते ।

**बटुः** - भृशं भीतोऽस्मि ।

**विदूषकः** - कुतः ।

**बटुः** - गुरुपुत्रद्वयदर्शनेन ।

**विदूषकः** - कस्ते गुरुः ।

**बटुः** - अत्रभवान् मारीचः कश्यपः ।

**विदूषकः** - तस्य का वा भार्या ।

**बटुः** - (सगर्वं हुङ्कृत्य ।) अय्यनभिज्ञ भार्येत्येकवचनप्रयोगस्स तु बहुभार्यस्तद्धर्मपत्नी भगवती दितिरित्येका तस्यामुत्पन्नौ ।

**विदूषकः** - ताभ्यां विषाणाग्रैः प्रहृतं खुरैर्वा ।

**बटुः** - (पुनः सक्रोधम् ।) आः पाप किं तौ पशू ।

**विदूषकः** - नो चेद्गुरुपुत्राणां शतमपि दृष्ट्वा को नाम बिभीयात् ।

**बटुः** - हन्त पुरुषपशो अश्रुत्वैव वलानां [वल्हनां] करोषि । न तावति-भयानकवपुषौ ।

**विदूषकः** - अये बटो वयसा कियन्तौ किंनामानौ ।

**बटुः** - अहो वयसा कियन्ताविति कः प्रश्नः । अद्यैवोत्पन्नौ हिरण्यकशिपु-हिरण्याक्षनामानाविति दूराच्छ्रुतम् ।

**विदूषकः** - हा धिक् । जन्मत एवेदृशौ भयानकौ तस्माद् गिलितोऽस्मि ।

**बटुः** - अवधारय तावत्स्वरूपं तद्द्वयस्य ।

**आचन्द्रार्कं यस्य मध्यप्रदेशोऽ-**
**ङ्गाराभं यल्लोचनद्वन्द्वमुग्रम् ।।**
**रक्तश्मश्रुक्रूरदंष्ट्रं गदाभृद्-**
**धेमोष्णीषं मेचकं घोरशब्दम् ।।१।।**

**विदूषकः** - अहह भीतोऽस्मि । तावदन्वेषयामि पिपीलिकाबिलं प्रवेष्टुम् । अहो उदरकार्श्यं तन्मातृचरणानाम् ।

**बटुः** - (सोत्साहम् ।) किमेतावता अवधारय तावत्तयोर्गर्भसम्प्राप्तिकालस्य रौद्रत्वम् ।

**तमस्तोमसान्द्रे दिगन्ते ग्रहाणां**
**मिथोमर्द्द आसीत् महोल्कानिपातः ।।**
**धरित्री चचालालमद्रिव्रजाद्याऽ-**
**भवंस्तोयदाः पूयदाः सर्वदिक्षु ।।२।।**

**विदूषकः** - (सशिरःकम्पम् ।) अवश्यमेतत् सर्वं निदानं साध्वसस्य यद्गर्भस्थितिमात्रेण प्रवृत्तमिदं माङ्गल्यं पुनः साम्प्रतं किं भविष्यति तन्न जाने तेनाहमपि भीतोऽस्म्यतितराम् । (इति भयं नाटयति ।)

(नेपथ्ये ।)

भो भो वेदाध्यायिनो बटवः अध्यापनावसरः किल भगवतः कश्यपस्य ।

**बटुः** - (श्रुत्वा ।) अघो जाल्म गच्छाम्याश्रममध्ययनावसरस्सम्प्राप्तः ।

**विदूषकः** - अहमप्येष्यामि भगवतः कश्यपस्य दर्शनाय ।

(इति निष्क्रान्तौ ।)

**(मिश्रविष्कम्भकः ।)**

(ततः प्रविशति पटाक्षेपेण सिंहासनं गृहीत्वाऽनुचरः ।)

(प्रविश्य ।)

**अनुचरः** - (सिंहासनं स्थापयित्वा । निष्क्रान्तः ।)

(नेपथ्ये ।)

**शतरूपाऽप्येकरूपा तया सार्द्धं प्रजेश्वरः ।।**
**स्वायम्भुवमनुः साक्षादागतश्चिन्तयाऽन्वितः ।।३।।**

(ततः प्रविशति यथानिर्दिष्टो मनुः ।)

**मनुः** - (शतरूपया सह सिंहासने उपविशति ।)

**शतरूपा** - (सविनयं साञ्जलिबन्धम् ।) आर्यपुत्र अप्रतिद्वन्द्वराज्यस्य सर्वभूतसुहृदस्तव चिन्ताकारणं न विमृशामि । यदि मे श्रवणार्हं तदाज्ञापयतु भट्टारकः । यतः ।

**निपुणा गुणानुरूपा प्रियंवदा स्वेष्टकार्यनिरताऽपि ।।**
**कान्ता न हि मन्त्रार्हा निसर्गचपला यतः सदा नार्यः ।।४।।**

**मनुः** - प्रिये सत्यमुक्तं परं त्वयि नेदं घटते । यतस्त्वं त्वहमेवातो हृदयान्तरमपेक्षितं मन्त्रे । यतः ।

**यद्यपि विचारयुक्तं हृदयं तदपि क्षमं न निर्णेतुम् ।।**
**तस्मान्मन्त्रे नियतं सद्धृदयान्तरमपेक्षते सुज्ञः ।।५।।**

**शतरूपा** - तर्ह्याहूयतां प्रतिपच्चन्द्रो मन्त्रिवरः । यः खलु ।

**दाक्षिण्यामृतजलधिर्मानी दानी सुपेशलः स्निग्धः ।।**
**विनयी धनी कुलीनः सोत्साहोऽधृष्य एष धर्मज्ञः ।।६।।**

**मनुः** - यथोचितं मीमांसितं भवत्या । कः कोऽत्र भोः ।

(प्रविश्य ।)

**दौवारिकः** - आज्ञापयतु देवः ।

**मनुः** - आकारणीयस्तावत्प्रतिपच्चन्द्रो मन्त्रिवरः ।

**दौवारिकः** - देवादेशः प्रमाणम् । (इति निष्क्रम्य तेन सह प्रविशति मन्त्री ।)

**मन्त्री** - (साञ्जलिबन्धं सप्रणामम् ।) विजयतामादिभट्टारकेन्द्रः ।

**मनुः** - भद्र प्रतिपच्चन्द्र स्वागतं ते निषीद मदुपकण्ठे ।

**मन्त्री** - (सविनयं निषीदति ।)

**मनुः** - कञ्चुकिँस्त्वं स्वस्थानमशून्यं कुरु ।

**कञ्चुकी** - देवादेशः प्रमाणम् । (इति निष्क्रान्तः ।)

**मन्त्री** - महाराज कथं स्मरणानुग्रहः कृत इति विविदिषा समुज्जृम्भते ।

**मनुः** - भद्र किं भणामि । धर्मसङ्कटे निष्पतितमात्मानं कथं समुद्धरिष्ये । शृणु ।

**वामाङ्गं यत्कलत्रं गृहिण इति समाहुर्वरिष्ठास्तु शास्त्रे**
**लोके भाक्तं प्रसिद्धं तदपि मयि यथार्थीकृतं येन दत्ते ।।**
**दिव्ये शक्तिस्वरूपे प्रभुपदमतुलं धर्मलोकानुरूपं**
**तस्याज्ञाभङ्गपङ्के क इह नु निपतेल्लोकधातुः कृतघ्नः ।।७।।**

**मन्त्री** - देव स्पष्टतया ज्ञातुमिच्छामि ।

**मनुः** - तथा शृणु ।

**धात्राऽऽज्ञप्तोऽहमिति प्रजास्सृज त्वं प्रमोदतो बह्वीः ॥**
**साऽऽज्ञा मया गृहीता परमाधारं विना सृजामि कथम् ॥८॥**

**मन्त्री** - (क्षणं विमृश्य ।) प्रभो एतदंशे स एव प्रार्थनीयः । यतः पितृमुखात् पूर्वं जातुचिच्छ्रुतं पृथ्वी नाम पात्रं प्रजार्थं प्रजापतिना प्राक्कल्पे रचितमिति ।

**मनुः** - (सहर्षम् ।) साधु भद्र साधु । प्रतिपज्ज्ञप्तिचेतना इत्यमरात् [अमरकोशः १.५.१] प्रतिपदा बुद्ध्या चन्द्रः चन्द्र इवाह्लादकः प्रकाशको वा इत्यर्थः । यथार्थनामासि तेनाहमुद्धृतश्चिन्तासागरान्मंत्रसद्गुणेन ।

**भृत्यः स एव योग्यः प्रभुकार्यं मोदतः शरीरेण ॥**
**वाण्या मनसा कुरुते प्रत्यक्षे वाऽपरोक्षे वा ॥९॥**

भद्र तथैवानुभूतं मया त्वयि ।

**मन्त्री** - (सविनयम् ।) नास्माकमत्र प्रभावः किन्तु प्रभुपद्मबन्धुपादानां प्रभावः । यतः ।

**द्विजराजोऽप्यमृतांशुर्विष्णुपदे संस्थितोऽपि वन्द्योऽपि ॥**
**पादैर्महसां राशेर्युक्तो रात्रौ तमः प्रणाशयति ॥१०॥**

**मनुः** - भवतु । गृहपवित्रीकरणायात्रैव ध्यानेन लोकपितामहं समाहूय निवेदनीयं निवेदयामि । (इति अक्षिणी निमील्य ध्यानं नाटयति ।) (क्षणं विश्रम्य अक्षिणी उन्मील्य ।) भद्र प्रतिपच्चन्द्र प्रणिधानप्रणयिनं प्रभुं पश्यामि अतस्तद्भङ्गदोषभाक् कथं भवामि समाह्वानेन ।

**मन्त्री** - (क्षणं विचार्य ।) महाराज ।

**अत्यावश्यककार्ये श्रमेऽपि दत्ते महानुभावा ये ॥**
**हृष्यन्त्यतिवात्सल्यात् स्वीयानां सर्वभूतसुहृदस्ते ॥११॥**

प्रभो श्रूयते हि पुरा देवानां स्वकार्यसाधनाय महर्षेरद्वितीयप्रभावस्य दधीचेरस्थ्नामभ्यर्थना किं पुनस्तदादिष्टेष्टकार्यनिष्पत्त्यै समाकारणे

शङ्कालेशोऽपि ।

**मनुः** - (क्षणं विमृश्य ।) भद्र इयमेव गतिः । (इति पुनर्ध्यानं नाटयति ।) (किञ्चित्कालानन्तरे पाटले नेत्रे समुद्घाट्य ।) (सानन्दम् ।) अयि मन्त्र्युत्तम सावधानो भव समागच्छति कृपानिधिर्विधिः ।

**मन्त्री** - (सहर्षम् ।) देव सावधानोऽहम् ।

(नेपथ्ये ।)

**ध्यानक्रियां परिसमाप्य समस्तलोक-**
**नाथश्चतुर्मुख इतश्चलितः कृपार्द्रः ॥**
**जाने न कस्य सुभगस्य मनोऽर्थसिद्ध्यै**
**हंसेन हंसविनुताङ्घ्रिसरोजयुग्मः ॥१२॥**

(ततः प्रविशति यथोक्तश्चतुर्मुखः ।)

(चतुर्मुखमवलोक्य सर्वेऽपि सहर्षमुत्तिष्ठन्ति ।)

**मनुः** - (अञ्जलिं बद्ध्वा सानन्दाश्रु ।)

**यस्य प्रभावगुणकर्मनिरूपणे ते**
**शेषोऽपि नेश इति किं प्रवदामि मन्दः ॥**
**तस्माच्चराचरगुरोस्तव पादमूले**
**मस्तं निधाय विधुनोम्यघसङ्घमाशु ॥१३॥**

(इति तत्पादमूले निपतति ।)

**शतरूपा** - (धृतकौशेयेन मुखमावृत्य लज्जानम्रमुखी साञ्जलिबन्धं तूष्णीं तिष्ठति ।)

**मन्त्री** - (साञ्जलिबन्धं सहर्षम् ।)

**भो भो प्रभो प्रणतपापपरम्पराया**
**हर्त्तश्चराचरविधानकृतावतार ॥**
**लोकैकनाथ करुणावरुणालय त्वं**
**शं नो विधेहि विमलेन्दुसमप्रकाश ॥१४॥**

(इति दण्डवत्प्रणम्य दूरं तिष्ठति ।)

**चतुर्मुखः** - (मनुमुत्तमाङ्गे स्पृष्ट्वा ।) वत्स उत्तिष्ठ उत्तिष्ठ । तव मनोऽभिलषितसिद्धिरस्तु ।

**मनुः** - तथाऽस्तु । (इत्युत्थाय शतरूपामवलोक्य ।) अयि प्रिये सर्वभूतसमे पितामहे प्रत्यक्षे का वा लज्जा मुखमुद्घाट्य पदपद्मयोः प्रणम ।

**शतरूपा** - (मन्दाक्षमन्दाक्षं तथा करोति ।)

**चतुर्मुखः** - (करमुदस्य ।) अखण्डसौभाग्यवती पत्युरनुमता च भव ।

**शतरूपा** - (उत्थाय दूरमधोमुखी तिष्ठति ।)

**चतुर्मुखः** - वत्स मनो निवेदय स्वमनोऽभिलषितम् ।

**मनुः** - (साञ्जलिबन्धम् । प्रेमगद्गदाक्षरम् ।)

**कृत्स्नभूतादभिन्नस्त्वं मृत्स्नेवायि घटात्प्रभो ।।**
**ज्योत्स्नेव तमसां हन्ता मत्स्नेहादागतः किल ।।१५।।**

एतादृशे त्वयि किं निवेदनीयं तथाप्याज्ञाभङ्गभिया विज्ञापयामि ।

**प्रभुचरणैराज्ञप्तोऽहं त्वं सृष्टिं प्रसारय प्रीत्या ।।**
**स्वीकृतं परं कथमधुनाऽऽधारं विना प्रजाः स्रज्याः ।।१६।।**

**चतुर्मुखः** - अयि पुत्रक यथोचितमुक्तं त्वया । (आकाशे दत्तदृष्टिः । क्षणं विमृश्य ।) वत्स अचिरात्ते चिन्ताप्रणाशप्रयत्नं करोमि । (इत्युक्त्वा । कमण्डलुजलेन मनोरुत्तमाङ्गमभ्युक्षति ।)

**मनुः** - महाप्रसादः । (इति नम्रस्तिष्ठति ।)

**चतुर्मुखः** - राजन् सिंहासनमलङ्कुरु ।

**मनुः** - स्वामिन्नाहं त्वत्सामीप्ये सिंहासनार्हः ।

**चतुर्मुखः** -

**सिंहासने मया दत्ते मदाज्ञातो विशेषतः ।।**
**कार्यसिद्ध्यै च तिष्ठ त्वं न दोषाय भवेत्तव ।।१७।।**

**मनुः** - (दण्डवत्प्रणम्य ।) यथाज्ञा गुरुचरणानाम् । (इति सिंहासने तिष्ठति ।)

**चतुर्मुखः** - वत्स निमील तावद्दृष्टिम् ।

**मनुः** - प्रभोराज्ञा प्रमाणम् । (इत्युक्त्वा । पद्मासनं कृत्वा हस्तावुत्सङ्गे निधाय ध्यानं नाटयति ।)

**चतुर्मुखः** - (क्षणान्तरे ।) वत्स किमपि पश्यसि ।

**मनुः** - (सध्यानम् ।) अद्वितीयमाकाशं पश्यामि ।

**चतुर्मुखः** - (द्विक्षणान्तरे ।) वत्स किमपि वस्त्वन्तरमवलोकयसि ।

**मनुः** - भगवंश्छ्रौतक्रमेण तुरीयं भूतं पश्यामि ।

**चतुर्मुखः** - (सहर्षम् ।) सम्पन्नः किल ध्यानमार्गे प्रवेशः । (पुनः किञ्चित्कालान्तरे ।) पुत्र अनुभवान्तरं सम्पन्नम् ।

**मनुः** - प्रभोः प्रभावात् ।

**चतुर्मुखः** - किं तत् ।

**मनुः** - पश्यामि किल ।

**वारां मध्ये पात्रमेकं विशालं**
**पृथ्वीत्येतद्धारणार्हं प्रजानाम् ।।**
**युक्ताभिख्यं दैववाग्बोधितं च**
**द्वीपाब्ध्यद्रिप्रावृतं तीर्थयुक्तम् ।।१८।।**

**चतुर्मुखः** - (अत्यानन्दम् ।) उपलब्धं किल मन्निदेशमहीरुहस्यालवालम् । क्षितीश्वर किमधुना ते दृष्टिपात्रम् ।

**मनुः** -

**भो ब्रह्मन्वपुषाऽतिदीर्घविततावातङ्कसम्प्रापकौ**
**हेमाकल्पपरिष्कृतौ धृतगदौ वीर्यावलेपावृतौ ।।**
**रक्तश्मश्रुतनूरुहेक्षणयुतौ भिन्नाञ्जनाद्रिप्रभौ**
**दैत्यौ सम्प्रति तस्य रक्षणनिरतौ पश्याम्यधृष्यावहम् ।।१९।।**

**चतुर्मुखः** - (किञ्चित्सखेदम् ।) वत्स प्राप्तमप्यप्राप्तमिव जानामि । (क्षणं

विमृश्य ।) भवतु । अनुभवान्तरमावेदय ।

**मनुः** - पुनराकाशमेव परिपश्यामि ।

**चतुर्मुखः** - वत्स मनो निवर्त्तस्व समाधिमार्गात् ।

**मनुः** - यथाज्ञा भगवत्पादानाम् । (इति दृष्टिमुन्मील्य प्रणमति ।)

**चतुर्मुखः** - (हस्तमुदस्य ।) अभिमतार्थसिद्धिरस्तु । आदिराजप्रजाधारपात्र उपलब्धेऽपि तत्प्राप्तिप्रयत्नस्त्ववशिष्ट एव । भवतु पुनः प्रणिधानेन दर्शयिष्यामि । राजन् पुनस्तन्मार्गानुसरणं विधेहि । (तदनन्तरम् ।)

**शतरूपा** - (साभिलाषं सलज्जमञ्जलिं बद्ध्वा ।) आर्यपुत्राहमप्य-लौकिकानुभवोत्सुकाऽस्मि । (तदन्तरे ।)

**चतुर्मुखः** - अयि वत्से तवाप्यस्ति किमलौकिकानुभवे मनीषा । चेद्दर्शयामि ते श्रद्धानुरूपं फलम् । एहि तावन्मत्सकाशे ।

**शतरूपा** - (तथा करोति ।)

**चतुर्मुखः** - (कमण्डलुजलेन तस्या अप्युत्तमाङ्गमभ्युक्षति ।)

**शतरूपा** - महाप्रसादः । (इत्यधोमुखी तिष्ठति ।)

**चतुर्मुखः** - अयि पतिव्रते पत्युर्वामाङ्गं भजस्व ।

**शतरूपा** - (सलज्जमधोदृष्टिः स्वल्पस्वरेण ।) गुरो नायं स्नुषाणां सदाचारः ।

**चतुर्मुखः** - वत्से न ह्यलौकिकफलविधौ लौकिकस्य प्राबल्यम् । यतः ।

**लोके सहोदरत्वं जायापतिताविघातकं दोषात् ।।**
**देहस्यैकस्यायं भागस्त्वयि पुण्यदस्तदपि वत्से ।।२०।।**

**शतरूपा** - (लज्जाऽधोमुखी ।) गुरुचरणानामाज्ञा प्रमाणम् । (इति तथा करोति ।)

**चतुर्मुखः** - वत्से निमील दृष्टिम् ।

**शतरूपा** - (तथा करोति ।)

**चतुर्मुखः** - (क्षणान्तरे ।) शतरूपे किं पश्यसि ।

**शतरूपा** - अप्रतियोगिनमाकाशं पश्यामि ।

**चतुर्मुखः** - (पुनः क्षणान्तरे ।) वत्से वस्त्वन्तरमालोकयसि ।

**शतरूपा** - पयःप्रायं पश्यामि ।

**चतुर्मुखः** - (सहर्षम् ।) आनन्दस्य कारणमभिमृशामि । (पुनः क्षणान्तरे ।) वत्से कथय तावदनुभवविषयम् ।

**शतरूपा** - अन्तःपयसि महःपुञ्जोऽस्ति दृष्टिविषयः ।

**चतुर्मुखः** - कृतकृत्यमात्मानं मन्ये ।

(पुनः किञ्चित्कालान्तरे ।)

**चतुर्मुखः** - वत्से सुधोपमं वचनं श्रावय ।

**शतरूपा** - भगवन्नन्तस्तेजसि किल मृणालशुभ्रभुजगेन्द्रफणासहस्रमणिश्रेणिप्रसृमराभीषुपाटलिततद्वर्ष्मानल्पतल्पे विश्राम्यन्तमश्रान्तप्रभासंवलितानर्घ्यरत्ननिकुरम्बरचितानल्पाकल्पकलितं दलितेन्दीवरश्यामलस्निग्धवपुषं प्रियेक्षणामृतासारसेकेन समुद्भूतैरविरलशृङ्गाराङ्कुरैरिव तनूरुहैर्विराजमानं धृतपीतकौशेयेन शम्पाशङ्कां संवर्द्धयन्तं निरुपमस्त्रीरत्नसंवाह्यमानस्वाङ्कधृतपादपद्मं नखरविद्रुमप्रसृत्वरप्रभाप्रकाशरञ्जितनिखिलप्रदेशं श्वासैजदुदरत्रिवलीमिषेण शृङ्गाररसवाहिनीतरङ्गपरम्परां प्रदर्शयन्तं विशदविपुलवक्षःस्थलेन निर्मलेन्द्रनीलशिलासुषमामधरी-कुर्वन्तं मांसलाभ्यामंसाभ्यां मांसलितनयनोत्सवं करिकरोपमैर्दरारिगदाम्बुजविशिष्टैश्चतुर्भिर्भुजदण्डैर्दर्शनीयम् अरालालकनिकरसंवृतास्येन रोलम्बावलम्बितनव्येन्दीवरश्रियं हसन्तं नितान्तकान्तकण्ठदेशेन कम्बुलक्ष्मीं तिरस्कुर्वन्तं शुकवदनसदृशनासिकासान्निध्येनाधरोष्ठे बिम्बफलसादृश्यं द्विगुणयन्तमन्तःस्मितप्रसरेण कृत्स्नज्योत्स्नां ह्रेपयन्तं समुन्निद्रतामरससरसाभ्यां विलोचनाभ्यां नेत्रानन्दप्रदं कुटिलभ्रुकुटिदण्डशोभातिरेकेण कुसुमकोदण्डकोदण्डच्छविं निर्भर्त्सयन्तं मणिमयमुकुटकोटिकिरणधोरणीनिर्धूतध्वान्तकदम्बमदृष्टपूर्वं पुरुषोत्तमं सौन्दर्यसुधासमुद्रं लोचनचषकाभ्यां भृशमास्वादयामि ।

**चतुर्मुखः** - (सहर्षं सभक्त्युन्मेषं सशिरःकम्पम् ।) अहो महद्भाग्यं खलु वत्सायाः

शतरूपायाः । यदस्मदादिभिरप्यतिकृच्छ्रेणागम्यं सर्वलोकैकनाथस्य श्रीमल्लक्ष्मीनारायणस्य दर्शनं सहसा समनुभवति ।

**शतरूपा** - (सध्यानं सविनयं साञ्जलिबन्धम् ।) भगवन् कृपानिधे तवानुग्रहकल्पद्रुमस्येदं स्वादुफलं किमत्रास्माकम् ।

(पुनः क्षणान्तरे ।)

**चतुर्मुखः** - अयि महाभागे अनुभवान्तरामृतसेचनं विरचयात्र श्रोत्रपात्रयोः ।

**शतरूपा** - गुरुचरणार्यपुत्रकृतस्तवेन प्रसादाभिमुखं पश्यामि लोकैकनाथम् ।

**चतुर्मुखः** - (सहर्षोद्रेकम् । हस्तमुदस्य ।) अयि पतिव्रते प्राप्तमनोरथा त्वम् । राजन् मनो दिष्ट्या वर्द्धसे प्रभोः प्रसादेन ।

**उभौ** - युष्मत्कृपाप्रभावेण ।

(पुनः क्षणान्तरे ।)

**चतुर्मुखः** - अये सम्प्राप्तफले वत्से किमधुना ध्यानगतं ते ।

**शतरूपा** - (किञ्चिन्म्लानमुखी ।) भगवन्पुनरप्याकाशमेवावलोकयामि ।

**चतुर्मुखः** - वत्से नेत्रे उन्मीलय । परिपूर्णमनोरथाऽसि ।

**शतरूपा** - यथाज्ञा गुरुपादानाम् । (इति तथा करोति ।) (सिंहासनादवतीर्य तिष्ठति ।)

**चतुर्मुखः** - भो आदिराजप्रभोः प्रसादेन फललाभे निश्चिन्तोऽस्मि । तथापि तत्प्राप्त्युपायविविदिषा मनस्यस्वास्थ्यमाकलयति ।

(तदन्तरे ।)

**मन्त्री** - (अञ्जलिं बद्ध्वा ।) भगवन् लोकैकगुरो भवदनुग्रहपात्रमहमप्यस्मि वात्सल्येन ।

**चतुर्मुखः** - (सस्मितम् ।) भद्र तवाप्यस्ति लोकोत्तरानुभवस्य जिज्ञासा ।

**मन्त्री** - (सविनयम् ।) स्वामिन् किं वच्मि तदनर्हः । यथा मनीषा कृपापारावारस्य ।

**चतुर्मुखः** - नहि नहि । भद्र योग्योऽसि तावदागच्छ मत्सविधम् ।

**मन्त्री** - (सहर्षम् उपसर्पति ।)

**चतुर्मुखः** - (कमण्डलुजलेन तस्याप्युत्तमाङ्गमभ्युक्षति ।)

**मन्त्री** - महाप्रसादः । (इति नम्रस्तिष्ठति ।)

**चतुर्मुखः** - भद्र मत्सम्मुखस्तिष्ठ ।

**मन्त्री** - (तथा करोति ।)

**चतुर्मुखः** - भद्र मीलय नेत्रे ।

**मन्त्री** - (तथा करोति ।)

**चतुर्मुखः** - मन्त्रिन् किमप्यवलोक पथस्थम् ।

**मन्त्री** - अनन्यमाकाशं पश्यामि ।

(किञ्चित्कालान्तरे ।)

**चतुर्मुखः** - कथय किं दृश्यते ।

**मन्त्री** - जगद्गुरो महाराजवर्णिता पृथ्वी मनुष्यादिभिश्चरैर्वृक्षादिभिः स्थावरैश्च स्थपुटिता प्रेक्षणपथस्था ।

**चतुर्मुखः** - (सहर्षम् ।) पर्याप्तमनोरथस्तव महाराजः । (पुनः क्षणान्तरे ।) भद्र साम्प्रतं दृक्सरणौ कः कः पदार्थः ।

**मन्त्री** - भगवन् कृपाकूपार भवदनुग्रहेण कृतकृत्योऽहम् । यतो देवीवर्णितं श्रीमत्कमलाकान्तं नारायणं प्रजापालनपरायणं प्रसादाभिमुखं च प्रपश्यामि ।

**चतुर्मुखः** - (अत्यानन्दम् ।) अहो वयं सर्वेऽपि परिपूर्णमनोरथाः स्मः । (किञ्चिदन्तरे ।) किमधुना ते दृष्टिगोचरम् ।

**मन्त्री** - (किञ्चिन्म्लानमुखः ।) पुनर्वियच्चक्रमेव ।

**चतुर्मुखः** - मन्त्रिवर विरमैतावतालम् ।

**मन्त्री** - (नेत्रे समुन्मील्य प्रणमति ।)

**चतुर्मुखः** - चिरञ्जीव राजकार्यनिरतो भव । (मनुमवलोक्य ।) राजन्नैतावतापि विविदिषा परिसमाप्ता । भवतु पुनः प्रणिधानेनैव निश्चिनोमि ।

**मनुः** - यथा मनीषा गुरुचरणानाम् ।

**चतुर्मुखः** - वत्स मनो पुनस्त्वमेव तावन्निमील दृष्टिम् ।

**मनुः** - (तथा करोति ।)

(कियत्कालान्तरे ।)

**चतुर्मुखः** - मनो किं पश्यसि ।

**मनुः** - भगवन् विष्णुपदद्वितीयं बृहत्तरं सहस्रपत्रं नेत्रपात्रीकरोमि ।

**चतुर्मुखः** - (सस्मितम् ।) मदीयं जनिस्थानमालोकपथपथिकं ते । (क्षणान्तरे ।) किं साम्प्रतं ते दृष्ट्याधारः ।

**मनुः** - भगवन् शुभ्राद्रिप्रतिमं महाबलकलं रक्ताक्तमत्यद्भुतं नेत्रानन्दकरं प्रसादसुसुखं पश्यामि कोलं शुभम् ।

**चतुर्मुखः** - (सभक्त्युन्मेषम् ।) मत्प्रभोरेव विग्रहान्तरं दैत्यहनने कृतश्रममिति मन्ये । वत्स प्रणम । भगवद्दर्शनेन कृतकृत्योऽसि ।

**मनुः** - (सभक्त्युन्मेषम् । ध्यानेन प्रणमति ।)

**चतुर्मुखः** - (कियत्कालान्तरे ।) वत्स किं ते दृष्टिगोचरः ।

**मनुः** - पश्यामि किल ।

**तद्दंष्ट्रामलनालतामरसतां प्राप्तां रसां साम्प्रतम् ।।**

**चतुर्मुखः** - (सानन्दाश्रु ।) अहो कीदृशः प्रभुर्वत्सलः । (क्षणान्तरे ।) अमृतोपमं वचनान्तरं श्रावय ।

**मनुः** - पश्यामि खलु प्रभुम् ।

**सृष्ट्यै सन्त्वरयन्तमाद्यभुवि मां त्वां त्वत्तनूजान्पुनः ।।२१।।**

**चतुर्मुखः** - (सहर्षं साञ्जलिबन्धम् ।) यथाज्ञा लोकैकनाथस्य । वयं सर्वेऽपि निदेशकराः । (क्षणान्तरे ।) वत्स किमथ नेत्रपात्रम् ।

**मनुः** - निराधारा दृष्टिः ।

**चतुर्मुखः** - पुत्र भवतु उद्घाटय विलोचनयुगलम् ।

**मनुः** - (तथा कृत्वा दण्डवत्प्रणमति ।)

**चतुर्मुखः** - (तत्पृष्ठदेशे मस्तके च करं निधाय) सुपुत्रोत्तिष्ठ उत्तिष्ठ । सागराम्बरां वसुन्धरां प्रजापरम्परापरमानन्दं चानुभुङ्क्ष्व ।

**मनुः** - तथाऽस्तु । (इति उत्तिष्ठति ।)

**चतुर्मुखः** - वत्स क्षितीश वयं समग्रा अप्यवाप्तमनीषिताः साम्प्रतं तस्मात् स्वलोकगमनस्य मनीषा समुन्मिषति ।

**मनुः** - यथाभिलषितं लोकपितामहस्य ।

(इति सर्वेऽप्युत्तिष्ठन्ति ।)

**चतुर्मुखः** - (हंसासनो नाट्येन समुत्पतति ।)

**मनुः** - (साञ्जलिबन्धम् ।) कृपाब्धे गतागतायासः क्षन्तव्यः ।

**चतुर्मुखः** - (सस्मितम् ।) अयि वत्स सर्वमेतदानन्दजनकम् ।

**मनुः** - इयमेव रीतिर्गरिष्ठानाम् परं मङ्क्षु दर्शनस्थूललक्ष्येण भवितव्यम् ।

**चतुर्मुखः** - वत्स तथैव । (इति निष्क्रान्तः ।)

**मनुः** - (शतरूपालङ्कृतपार्श्वः सिंहासने तिष्ठति ।) भद्र प्रतिपच्चन्द्र अद्य किल प्रसङ्गान्तरेण जन्मनः साफल्यं संवृत्तम् ।

**शतरूपा** - आर्यपुत्रैवमेव ।

**मन्त्री** - (सविनयम् ।) स्वामिन् भवादृशानां भगवदाविष्टानां किमसदृशम् । पुनर्मादृशानां जन्मसाफल्यं समजनीति चित्रम् ।

(पटाक्षेपेण प्रविश्य ।)

**प्रतीहारः** - विजयतां विजयतां महाराजः । सभास्थलमलङ्कुर्वन्तः परमर्षयः काङ्क्षन्ति भवत्समागमम् ।

**मनुः** - (सहर्षम् ।) अहो सम्प्राप्तं फलान्तरम् । यतः ।

**येषां पदाब्जपरिपूजनसोत्सवोऽस्ति**
**श्रीश्रीनिवास इति किं प्रवदामि तेषाम् ।।**
**सूच्चं समागमफलं सुकृतैकसूच्च-**
**निःश्रेणिकातिसुलभं ननु देवि मन्ये ।।२२।।**

**शतरूपा** - यथा वदति ब्रह्मण्यदेवस्तथैव ।

**मनुः** - भवतु तेषां दर्शनाय जङ्घालतया गच्छामः ।

(इति निष्क्रान्ताः सर्वे ।)

**।। इति श्रीनृसिंहविजयनाम्नि नाटके द्वितीयोऽङ्कः ।।**

